# Shri Karmachandracharyanirmitah Karmabandhavinashaka Stava

# શ્રીકર્મચન્દ્રાચાર્યનિર્મિતઃ કર્મબન્ધવિનાશકસ્તવઃ

## Document Information

Text title : Shri Karmachandracharyanirmitah Karmabandhavinashaka Stava

File name : karmabandhavinAshakastavaHkarmachandrAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : karmachandrAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીકર્મચન્દ્રાચાર્યનિર્મિતઃ કર્મબન્ધવિનાશકસ્તવઃ

રામાનન્દં નમસ્કૃત્ય ભાષ્યકૃદ્ધર્મિનાં પતિમ્ ।
કર્મબન્ધવિનાશાય કુર્વે રામસ્તવં વરમ્ ॥ ૧॥

યસ્મિન્ હિ સચ્ચિદાનન્દે રમન્તે યોગિનઃ સદા ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૨॥

ઉપાદાનં નિમિત્તં ચ સર્વસ્ય જગતોઽસ્ય યઃક્ષ ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૩॥

સકૃદેવ પ્રપત્ત્યા યઃ સર્વેભ્યોઽભયદઃ પ્રભુઃ ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૪॥

યદ્ભક્ત્યા યત્પ્રપત્ત્યા વા સાયુજ્યં સમવાપ્યતે ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૫॥

પાપાનાં નાશકં યસ્ય રામેતિનામકીર્ત્તનમ્ ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૬॥

વિશ્વસ્ય સૃષ્ટિકૃચ્ચાથ સ્થિતિકૃલ્લયકૃત્તથા ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૭॥

ગુણાબ્ધિર્દિવ્યદેહો યઃ સર્વશક્તિશ્ચ સર્વવિત્ ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૮॥

વૃત્તં રામાયણં યસ્ય વેદોપબૃંહણં મતમ્ ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૯॥

વેદવિદ્ વેદવેદ્યો યો વેદકૃદ્ વેદભૃત્ તથા ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૧૦॥

અમોઘં વન્દનં યસ્ય પૂજનં દર્શનં તથા ।
શ્રીરામં બ્રહ્મ તં વન્દે કર્મબન્ધવિનાશકમ્ ॥ ૧૧॥

દ્વારપીઠાધિપશ્રીમત્કર્મચન્દ્રાર્યનિર્મિતઃ ।
સ્તવોઽયં પઠતાં ભૂયાત્ સર્વથા સુખદાયકઃ ॥ ૧૨॥

ઇતિ શ્રીકર્મચન્દ્રાચાર્યનિર્મિતઃ કર્મબન્ધવિનાશકસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Karmachandracharyanirmitah Karmabandhavinashaka Stava*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*